मथासाद्य बिभेद रुधिराशनः। न चैनमशकत् त्यक्तुं हन्तुं वापि गुरोर्भयात्। स दश्यमानस्तु तथा क्रमिणा तेन भारत!। गुरोः प्रबोधनाशङ्की तमुपैक्षत सूर्य्यजः। कर्णस्तु वेदनां धैर्य्यादसह्यां विनिगृह्य ताम्। अकम्पयन्नव्यथयन् धारयामास भार्गवम्। यदास्य रुधिरेणाङ्गं परिस्पृष्टं भृगूद्वहः। तदाऽबुध्यत तेजस्वी सन्तप्तश्चेदमब्रवीत्। अहोऽस्म्यशुचितां प्राप्तः किमिदं क्रियते त्वया। कथयस्व भयं त्यक्त्वा याथातथ्यमिदं मम। तस्य कर्णस्तदाचष्ट क्रमिणा परिभक्षणम्। ददर्श रामस्तं चापि क्रमिं सूकरसन्निभम्। अष्टपादन्तीक्ष्णदंष्ट्रं सूचिभिरिव संवृतम्। रोमभिः सन्निरुद्धाङ्गमलर्कं नाम नामतः। स दृष्टमात्रो रामेण क्रमिः प्राणानवासृजत्। तस्मिन्नेवासृजि क्लिन्नस्तदद्भुतमिवाभवत्। ततोऽन्तरीक्षे ददृशे विश्वरूपः करालवान्। राक्षसो लोहितग्रीवः कृष्णाङ्गो मेघवाहनः। स रामं प्राञ्जलिर्भूत्वा बभाषे पूर्णमानसः। स्वस्ति ते भृगुशार्दूल। गमिष्यामि यथागतम्। मोचितो नरकादस्माद्भवता मुनिसत्तम!। भद्रञ्च तेऽस्तु वन्दे त्वां प्रियं मे भवता कृतम्। तमुवाच महाबाहुर्जामदग्न्यः प्रतापवान्। कस्त्वं कस्माच्च नरकं प्रतिपन्नो ब्रवीहि तत्। सोऽब्रवीदहमासं प्रागृत्सो नाम महासुरः। पुरा देवयुगे तात! भृगोस्तुल्यवया इव। सोऽहं भृगोः सुदयितां भार्य्यामपहरं बलात्। महर्षेरभिशापेन क्रमिभूतोऽपतं भुवि। अब्रवीद्धि स मां क्रोधात्तव पूर्व्वपितामहः। मूत्रश्लेष्माशनः पाप निरयं प्रतिपत्स्यसे। शापस्यान्तो भवेद्ब्रह्मन्नित्येवं तमथाब्रुवम्। भविता भार्गवाद्रामादिति मामब्रवीद्भृगुः"।

**अलपस्** न० न रपः पापम् न०त० रस्य लः। अपापे पुण्ये।

**अलवाल** न० लवमालाति ला—क न०त०। वृक्षसेकार्थे वृक्षमूले कृदादिकृते जलाधारे वेष्टने स्वार्थेऽण्। आलवालमप्यत्र।

**अलस** त्रि० न लसति व्याप्रियते लस—अच्। अवश्यकर्त्तव्येषु शरीरापाटवमभिनीय १कृताप्रयासे, "मृदुतरतनवोऽलसाः प्रकृत्याः" माघः अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः। २क्रियामन्दे च (फाकुँड़) ३पादरोगभेदे, ४वृक्षभेदे च पु०। ५हंसपदीलतायां स्त्री। पादरोगो यथा "क्लिन्नाङ्गुल्यन्तरौ पादौ कण्डूदाहरुजान्वितौ। दुष्टकर्दमसंस्पर्शादलसं च विभावय" पादौ सिक्त्वारनालेन लेपनं ह्यलसे हितम्" इति च सुश्रुतः। गर्गादिगणपाठात् ४मुनिभेदे ततः अपत्ये यञ् आलस्यस्तदपत्ये लोहिता०यूनि ष्फ आलस्यायनः। अलसस्य भावः ष्यञ्। आलस्यम् न० तल् अलसता स्त्री त्व अलसत्वं न०। क्रियाकरणाय अप्रयत्ने।

**अलसक** पु० न लसति अनेन लस करणे—बा० वुन्। १रोगभेदे। यथाह सुश्रुतः "अजीर्णमामं विष्टब्धं विदग्धं च यदीरितम्। विसूच्यलसकौ तस्माद्भवेताम्" इत्युपक्रम्य "कुक्षिरानह्यतेऽत्यर्थं ताम्यत्यल्पर्थं च कूजति। निरुद्धो मारुतोवापि कुक्ष्यावुपरि धावति। वातवर्चोनिरोधश्च यस्यात्यर्थं भवेदपि। तस्यालसकमाचष्टे तृष्णोद्गारौ च यस्य तु"। तन्निरुक्तिरपि अन्यत्र दर्शिता "प्रयाति नोर्द्ध्वं नाधस्तादाहारो न च पच्यते। आमाशयेऽलसीभूतस्तेन सोऽलसकः स्मृतः"। अलस+स्वार्थे कन्। २अलस शब्दार्थे त्रि०।

**अलात** पु० न०। ला—क्त न०त०। (कोयाला) इति ख्याते (आङ्गार) इति ख्याते च अर्द्धदग्धकाष्ठे। "निर्वाणालातलाघवम्" कुमा०।

**अलातृण** त्रि० अलमत्यर्थमातृणा आतर्द्दनाः अलम्+आ+तृद नि० दस्य न मलोपश्च। आतर्द्दनशीले। "अलातृणासो विदथेषु सुष्टुताः" ऋ०१,१६६,७, "अलातृणासः अलमत्यर्थं शत्रूणामातर्द्दनाः" भा०।

**अला(बु)बू** स्त्री न लम्बते न+लबि—उ णित् नलोपश्च वृद्धिः। (लाउ), तुम्ब्याम्। वा ऊङ्। अलाबूस्तत्र। "अलाबूं वर्त्तुलाकारां वार्त्ताकुं कुन्दसन्निभाम् स्मृतिः"।

**अलाबुमय** त्रि० अलाबु+विकारे मयट्। शुष्कालाबुत्वङ्निर्मिते पात्रे "यतिपात्राणि मृद्वेणुदार्व्वलाबुमयानि च। सलिलैः शुद्धिरेतेषां गोबालैश्चावघर्षणम्" या० स्मृतिः।

**अलाबुकट** न० अलाबूनां रजः अलाबू+रजोऽर्थे कटच्। तुम्बीरजसि।

**अलाभ** पु० न लाभः अभावे न०त०। १लाभाभावे "नायं नलः खलु तवातिमहानलाभः" नैष०। "सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ" गी०। "अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्" स्मृतिः "अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत्" मनुः। न०ब०। २लाभशून्ये त्रि०।

**अलाय्य** त्रि० ऋ—आय्य—रस्य लः। १गमनशीले २अभिमुखगन्तरि शत्रौ च। "अलाय्यस्य परशुर्ननाश" ऋ०९,६७,३०, "अलाय्यस्य अभिगमनशीलस्य शत्रोः" भा०।

**अलार** न० अराय्यते ऋ—यङ् लुक् अच् रस्य लः। कपाटे शब्दर०।

**अलास** पु० न लसति अनेन लस—करणे घञ् न०त०।